# वैयाकरणसिद्धान्तकौमुदी

## विसर्गसन्धिप्रकरणम् (१)

# पीठिका

- रामः + अपि = रामोऽपि
- रामाः + अपि = रामा अपि
- हरिः + अपि = हरिरपि
- गुरुः + इह = गुरुरिह
- कृष्णः + गच्छति = कृष्णो गच्छति
- बालाः + गच्छन्ति = बाला गच्छन्ति
- कविः + गच्छति = कविर्गच्छति

- रामः + करोति = रामᳵकरोति / रामः करोति ।
- हरिः + पातु = हरिᳶपातु / हरिः पातु ।
- यशः + कामः = यशस्कामः ।
- नमः + करोति = नमस्करोति / नमᳵकरोति / नमः करोति ।
- दुः + कार्यम् = दुष्कार्यम् ।
- गुरुः + क्षणेन = गुरुः क्षणेन ।

बालः + सः = बालस्सः / बालः सः ।

हरिः + शेते = हरिश्शेते / हरिः शेते ।

बालः + तत्र = बालस्तत्र

रामः + चिनोति = रामश्चिनोति ।

| | | |
|---|---|---|
| सः + एषः | = | स एषः । |
| एषः + विष्णुः | = | एष विष्णुः । |
| सः + एषः | = | सैष दाशरथी रामः । |
| दाशरथिः + रामः | = | दाशरथी रामः । |
| पुनः + रमते | = | पुना रमते । |
| मनः + रथः | = | मनोरथः । |

# ७६. खरवसानयोः विसर्जनीयः (८.३.१५)

- पदद्वयम् । खरवसानयोः, विसर्जनीयः । 'रो रि' (८.३.१४) इत्यतः रः इत्यनुवर्तते ।
- रः – षष्ठी = रेफस्य स्थाने
- खरवसानयोः – सप्तमी = खरि अवसाने च परे
- विसर्जनीयः – प्रथमा = विसर्गः स्यात्
- खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात् ।
- राम र् = रामः
- पुनर् + तत्र = पुनः तत्र
- विष्णुर् + त्राता = विष्णुः त्राता

# १३८. विसर्जनीयस्य सः (८.३.३४)

- पदद्वयम् ।
- 'खरवसानयोः विसर्जनीयः' (८.३.१५) इत्यतः 'खरि' इति अनुवर्तते ।
- खरि – सप्तमी = खरि परे
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- सः – प्रथमा = सकारः स्यात्
- खरि विसर्जनीयस्य सः स्यात् ।
- विष्णुः + त्राता = विष्णुस्त्राता ।

# १५०. शर्परे विसर्जनीयः (८.३.३५)

- पदद्वयम् ।
- 'खरवसानयोः विसर्जनीयः (८.३.१५) इत्यतः 'खरि' इति, 'विसर्जनीयस्य सः' (८.३.३४) इत्यतः''विसर्जनीयस्य' इति च अनुवर्तते ।
- शर्परे खरि – सप्तमी = शर्-वर्णपरके खर्-वर्णे परे
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- विसर्जनीयः – प्रथमा = विसर्ग एव स्यात्
- शर्परे खरि विसर्जनीयस्य विसर्जनीयः, न तु अन्यत् ।

कः + त्सरुः

कः + त्   स्   अरुः

खर्   शर्

कः + त्   स्   अरुः

घनाघनः + क्षोभणः [ ःः + क् + ष्]

इह यथायथं सत्वं जिह्वामूलीयश्च न ।

# १५१. वा शरि (८.३.३६)

- पदद्वयम् ।
- विसर्जनीयस्य सः (८.३.३४) इत्यतः 'विसर्जनीयस्य' इति, शर्परे विसर्जनीयः (८.३.३५) इत्यतः 'विसर्जनीयः' इति च अनुवर्तते ।
- शरि – सप्तमी = शर्-वर्णे परे
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- विसर्जनीयः – प्रथमा = विसर्गः
- वा = विकल्पेन भवति
- शरि परे विसर्जनीयस्य विसर्जनीय एव स्याद् वा ।

हरिः + शेते = १. हरिः शेते (वा शरि )

हरिस् शेते (विसर्जनीयस्य सः)

२. हरिश् शेते (स्तोः श्चुना श्चुः)

# खर्परे शरि वा विसर्गलोपो वक्तव्यः (वा)

- रामः + स्थाता

1. राम स्थाता (खर्परे शरि वा विसर्गलोपो वक्तव्यः)
2. रामः स्थाता (वा शरि)
3. रामस् स्थाता (विसर्जनीयस्य सः)

- हरिः + स्फुरति

1. हरि स्फुरति (खर्परे शरि वा विसर्गलोपो वक्तव्यः)
2. हरिः स्फुरति (वा शरि)
3. हरिस् स्फुरति (विसर्जनीयस्य सः)

- पक्षे विसर्गे सत्वे च त्रैरूप्यम् ।